**केन्द्रीय विद्यालय कुंजबन**

पूर्वमध्यसत्रपरीक्षा

कक्षा – नवमी                    विषयः - संस्कृतम्

कुल-अङ्काः– **40**

---

‘क’ खण्डः अपठित-अवबोनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

प्रदूषणस्य समस्या अस्माकं देशस्य प्रमुखा समस्या अस्ति। प्रदूषणस्य आधिक्येन जनाः निरन्तरं विविधैः रोगैः आक्रान्ताः भवन्ति। प्रदूषणस्य निराकरणाय सर्वकारः बहुविधं प्रयासं करोति परन्तु प्रदूषणं तु अनवरतं वर्धते। यावत् जनाः जागरूकाः न भविष्यन्ति तावत् अस्याः समस्यायाः समाधानं न भविष्यति। अस्याः समस्यायाः समाधानार्थं वृक्षाः रोपणीयाः उद्योगानां विस्तारः च वैज्ञानिकरीत्या करणीयः।

**I)** एकपदेन उत्तरत-                    1X2= 2

i) का समस्या देशस्य प्रमुखा समस्या अस्ति?
ii) प्रदूषणस्य आधिक्येन विविधैः रोगैः के आक्रान्ताः भवन्ति?

**II)** पूर्णवाक्येन उत्तरत-                    2X1= 2

i) प्रदूषणस्य समस्यायाः समाधानार्थं किं किं करणीयम्?

**III)** शीर्षकलेखनम्-                    1X1= 1

i) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत ।

ख खण्डः- रचनात्मकं कार्यम्

**2.** भवान् अर्णवः। भवता स्वमित्रं सिध्दान्तं प्रति परीक्षायां सफलतायै वर्धापनार्थं लिखेते पत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत ।                    **1/2X8= 4**

परीक्षा भवनम्
दिल्लीतः
तिथिः : …………
प्रिय सिध्दान्त !
(i)………..

अत्र कुशलं तत्रास्तु। (ii)……….. परीक्षायाः सफलतायाः पत्रम् अधुनैव (iii)……….. । भवतः परीक्षा परिणामः ज्ञात्वा (iv)……….. अभवत् । अहर्निशं प्रयासं कृत्वा भवान् 97% प्रतिशतं (v)……….. लब्धवान्। त्वं मम परिवारस्य साधुवादान् अर्हसि। पत्रे तुभ्यं पुनः वर्धापनं (vi)………..।(vii)………..सादरं नमः ।

भवतः(viii)……….. ।

अर्णवः

| मञ्जूषा:- संतोषः, पितृभ्याम्, अङ्कान्, भवतः, कामये, प्राप्तम्, सप्रेम नमस्ते, मित्रम् |
|---|

**3.** चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारिवाक्यानि संस्कृतेन लिखत- **1X4= 4**



| मञ्जूषाः- खेलन्ति, क्रीडाङ्गणे, वृक्षाः, बालाः, फुटबॉलक्रीडा, पश्यन्ति, गृहम्, क्रीडाङ्गणस्य |
| --- |

अथवा

मञ्जूषायां प्रदत्तशब्दानां सहायतया ग्रामीण-जीवनम् इति विषयम् अधिकृत्य चत्वारिवाक्यानि संस्कृतेन लिखत।

| मञ्जूषा- शिक्षिताः, जनाः सर्वसुविधासम्पन्नाः, क्षेत्राणि, सिञ्चति, अपि, विद्यालयः वैज्ञानिकविधिना, अस्ति, कुर्वन्ति, कृत्रिम, पठन्ति, हरीतिमा, सर्वत्र, प्रदूषणरहितम्। |
| --- |

'ग' खण्डः- अनुप्रयुक्त-व्याकरणम्

**4.** उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत- **1X3= 3**

i) कालिदासस्य .............. प्रसिद्धाः सन्ति।

अ) सूक्तिः ब) सूक्तेः स) सूक्तयः द) सूक्तिम्

ii) .............. सेवनं स्वास्थप्रदं भवति ष

अ) फलम् ब) फलानि स) फलानाम् द) फलैः

iii) तस्मै श्री .............. नमः।

अ) गुरवे ब) गुरूणा स) गुरूम् द) गुरूना

**5.** उचितधातुरूपाणि चित्वा रिक्तस्थानानि पूरयत- **1X3= 3**

i) ये परिश्रमं करिष्यन्ति ते नूनं सफलाः ..............।

अ) भविष्यतः ब) भविष्यामि स) भविष्यथ द) भविष्यन्ति

ii) केरलप्रदेशे अनेके जनाः शिक्षिताः ..............।

अ) अस्ति   ब) असि   स) अस्मि   द) सन्ति

iii) आवां मिलित्वा भोजनं ..............।

अ) पचेयम्   ब) पचेव   स) पचेत्   द) पचेम

**6.** उचितविभक्तिप्रयोगेन वाक्यानि पूरयत। **1X3= 3**

i) .............. बहिः रक्षकः तिष्ठति।

अ) गृहम्   ब) गृहात्   स) गृहस्य   द) गृहे

ii) सीता .............. सह वनम् अगच्छत् ।

अ) रामं   ब) रामस्य   स) रामः   द) रामेण

iii) ..............उभयतः वृक्षाः सन्ति ।

अ) विद्यालयात्   ब) विद्यालयम्   स) विद्यालेन   द) विद्यालयस्य

**7.** सन्धिं/सन्धिविच्छेदं वा कुरुत - **1X3= 3**

i) हिमालयाः अस्माकं देशस्य प्रहरी अस्ति।
ii) देव+इन्द्रः वनं गच्छति ।
iii) शुभमः कुत्रापि गच्छति।

‘घ’ खण्डः- पठित-अवबोधनम्

**8.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

नैतादृशः स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः। तण्डुलान् खादन्तं हसन्तञ्च विलोक्य बालिका रोदितुमारब्धाः। तं निवारयन्ती सा प्रार्थयत्-तण्डुलान् मा भक्षय। मदीया माता अतीव निर्धना वर्तते। स्वर्णपक्षः काकः प्रोवाच, मा शुचः। सूर्योदयात्प्राग ग्रामाद् बहिः पिप्पल-वृक्षमनु त्वयादन्तव्यम्। अहं तुभ्यं तण्डुलमूल्यं दास्यामि। प्रहर्षिता बालिका निद्रामपि न लेभे।

**I)** एकपदेन उत्तरत- **1/2X2= 1**
i) कः प्रोवाच, मा शुचः?
ii) स्वर्णपक्षी कः चञ्चुः?
**II)** पूर्णवाक्येन उत्तरत- **1X1= 1**
i) बालिकया पूर्वं किं दृष्टम् आसीत्?
**III)** भाषिककार्यम्- **1X3= 3**
i) ‘हसितुम्’ इत्यस्य किम् विलोमपदं गद्यांशे प्रयुक्तम्?
ii) ‘अहं तुभ्यं तण्डुलमूल्यं दास्यामि’ वाक्ये ‘तुभ्यं’ पदं कस्यै प्रयुक्तम्?
iii) ‘प्रोवाच’ पदे सन्धिच्छेदं कुरु?
**9.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-

निनादय नवीनामये वाणि ! वीणाम् ।
मृदुं गाय गीतिं ललित-नीति-लीनाम्।
मधुर-मञ्जरी-पिञ्जरी-भूत-मालाः
वसन्ते लसन्तीह सरसाः रसालाः
कलापाः ललित-कोकिला-काकलीनाम् ।।

**I)** एकपदेन उत्तरत- **1/2X2= 1**

i) कीदृशीं वीणां निनादयितुं प्रार्थयति?

ii) सरसाः रसालाः कदा लसन्ति?

**II)** पूर्णवाक्येन उत्तरत- **1X1= 1**

i) वसन्ते किं भवति?

**III)** भाषिककार्यम्- **1X3= 3**

i) 'आम्राः' इत्यस्य किं पर्यायपदं पद्यांशे प्रयुक्तम्?

ii) 'लसन्ति' क्रियापदस्य कर्ता कः?

iii) 'वसन्ते लसन्तीह सरसा रसालाः' अत्र अव्ययपदं किम्?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणम् कुरुत । **1X3= 3**

i) स्वर्णकाकं निवारयन्ती बालिका प्रार्थयत्।

ii) लुब्धा वृद्धा स्वर्णकाकस्य रहस्यमभिज्ञातवती।

iii) सनीरे समीरे मन्दमन्दं वहति।

**11.** निम्नलिखितवाक्यानि घटनाक्रमानुसारं पुनर्लिखत- **1/2X4= 2**

अ) एकदा माता स्थाल्यां तण्डुलान्निक्षिप्य पुत्रीमादिदेश।

आ) पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यववसत्।

इ) सूर्योदयात्पूर्वमेव सा तत्रोपस्थिता।

ई) तस्मिन्नेव ग्रामे एकाऽपरा लुब्धा वृद्धा न्यवसत्।